# संस्कृतम् ।

**अष्टमीकक्षाछात्राणां संस्कृतभाषाविषये अधोलिखितानां क्षमतानां विकासः भवेत् इति अपेक्षा वर्तते ।**

| क्षेत्रम् | क्षमताविधानानि |
|---|---|
| **श्रवणम्** | १. संस्कृतवर्णमाला, वर्णानाम् उच्चारणस्थानानि, स्वराणां ह्रस्वदीर्घौ भेदौ तथा एतेषां श्रवणेन परिचयः।<br>२. संस्कृतभाषा तथा मातृभाषा अनयोः साम्यस्थलानाम् अवगमनम् ।<br>३. शिक्षकेण दत्तानां सुगमसूचनानां श्रवणम् ।<br>४. ध्वनिमुद्रितसंस्कृतगीतानां संस्कृतसंवादानां च श्रवणम् । |
| **भाषणम्** | १. श्लोकानां छन्दः अनुसृत्य पठनम् ।<br>२. गीतानां सम्यक् गायनम् ।<br>३. संस्कृतमाध्यमेन एकपदेन उत्तरम् ।<br>४. शिक्षकेण पृष्टानां प्रश्नानां संस्कृतमाध्यमेन उत्तराणि ।<br>५. संस्कृतमाध्यमेन शुभाशंसनम् । |
| **पठनम्** | १. मुद्रितपाठस्य संस्कृतवर्णोच्चारणवैशिष्ट्यानि अनुसृत्य वाचनम् ।<br>२. संस्कृतपाठस्य आशयमनुसृत्य वाचनम् ।<br>३. आन्तरजाले वर्तमानस्य पूरकसाहित्यस्य वाचनम् / श्रवणम् ।<br>४. ख्यातानि संस्कृतबोधवाक्यानि, प्रचलिताः श्लोकाः इत्यादिकानां पठनम् । |
| **लेखनम्** | १. दोषविरहितम् अनुलेखनम् ।<br>२. अनुस्वारः तथा ह्रस्वदीर्घौ आदिविषयकान् लेखननियमान् अनुसृत्य लघुवाक्यानां रचना ।<br>३. प्रश्नानाम् उत्तराणां संस्कृतमाध्यमेन लेखनम् । |
| **अध्ययनम्** | १. संस्कृतशब्दकोषस्य वर्णक्रमम् अनुसृत्य अभ्यासः प्रयोगः च ।<br>२. संस्कृतविनोदकणिकानाम् आस्वादः ।<br>३. अधीतसंस्कृतशब्दानां सम्भाषणे प्रयोगः ।<br>४. कथाश्लोकादिषु अन्तर्भूतानां मूल्यानां वर्तमानौचित्यस्य अनुभूतिः, वर्तने तदनुसृत्य परिवर्तनं च।<br>५. पञ्चतन्त्रं, हितोपदेशः आदिषु वर्तमानानां कथासुभाषितानां सङ्ग्रहः ।<br>६. व्यवहारे संस्कृतमाध्यमेन किञ्चित् सम्भाषणम् ।<br>७. अमरकोषस्य परिचयः । |
| **भाषाभ्यासः** | १. आधुनिकभारतीयभाषासु प्रचलितानां तत्समसंस्कृतशब्दानाम् अभिज्ञानम् ।<br>२. शब्दस्य प्रातिपदिकधात्वादिमूलरूपस्य तथा रूपवैविध्यस्य ज्ञानम् ।<br>३. लिङ्गं, पुरुषः, वचनं, विशेषणं कालः च आदीनां भाषिकसङ्कल्पनानाम् अवगमनम् ।<br>४. अनुवर्तिनं व्यञ्जनम् अनुसृत्य अनुस्वारलेखने तथा उच्चारणे यद् परिवर्तनं भवति तस्य ज्ञानम् ।<br>५. व्यञ्जनान्तानां तथा स्वरान्तानां शब्दानां भेदस्य अवगमनम् ।<br>६. लकारादिपाणिनीयसंज्ञानां परिचयः प्रयोगः च । लट् (वर्तमानकालः), लङ् (भूतकालः) इ.<br>७. एकतः पञ्चाशत्पर्यन्तानां (१-५०) सङ्ख्यानां परिचयः । |

**पाठ्यपुस्तकस्य अपेक्षितपरिणामार्थं सर्वासां क्षमतानां सुयोग्यविकासार्थं प्रतिसप्ताहं तिस्रः (३) तासिकाः अपेक्षिताः ।**

# अनुक्रमणिका

## प्रथमः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| • | प्रार्थना | १ |
| • | चित्रपदकोषः । | २ |
| १. | परिचयः । | ५ |
| २. | कः, का, किम्? | ६ |
| ३. | के कुर्वन्ति? | ९ |
| ४. | द्वौ, द्वे, द्वे । | ११ |
| ५. | अहं, त्वम् । | १२ |
| • | श्रवणाभ्यासः । | १३ |
| • | भाषासूत्रम् १ । | १४ |
| • | वर्गपरीक्षा । (कृतिपत्रिका) | १७ |


## द्वितीयः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| ७. | वर्णानां संवादः । | १८ |
| ८. | ८.१ सम्बन्धवाचकाः । | २० |
| | ८.२ कुत्र अस्ति? | २२ |
| | ८.३ सहायकाः । | २३ |
| | ८.४ किम्? किम्? | २५ |
| | ८.५ कस्मै? कस्यै? | २६ |
| | ८.६ कस्मात् स्थानात्? | २७ |
| | ८.७ सम्बोधनम् । | २८ |
| ९. | विभक्तिमाला । | २९ |
| • | भाषासूत्रम् २ । | ३१ |


## तृतीयः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| १०. | आत्मनेपदीया । | ३५ |
| ११. | अश्वस्य स्वामिनिष्ठा । | ३८ |
| १२. | समानमस्तु भोजनम् । | ३९ |
| • | भाषासूत्रम् ३ । | ४१ |


## चतुर्थः घटकः


| अ.क्र. | पाठः | पृ. क्र. |
|---|---|---|
| १३. | सूक्तिसुधा । | ४६ |
| १४. | उपकारस्य स्मरणम् । | ४७ |
| • | भाषासूत्रम् – ४ । | ४९ |
| • | कृतिपत्रिका–द्वितीयसत्रम् । | ५३ |


*शिक्षकेण अवधातव्याः अंशाः ।*

शिक्षकस्य पठनं स्पष्टं भवेत् । प्रारम्भस्तरे यथा एकैकस्य शब्दस्य उच्चारणं स्पष्टं भवेत् तथा शनैः शनैः सावधानतया शिक्षकः वाचनं कुर्यात् । तत् श्रुत्वा यदा छात्राः अनुकरणं करिष्यन्ति तदा छात्रान् उच्चारणं बोधयेत् । नूतनशब्दानां परिचयसमये आदौ स्पष्टोच्चारणं कृत्वा तदनन्तरम् अभिनयेन अर्थं बोधयेत् । श्लोकानां गीतानां पाठनसमये सुयोग्या गेयता भवेत् । प्रारम्भस्तरे पठनदोषाः न गणनीयाः । केवलं प्रयत्नाः प्रशंसनीयाः। धातुकोषः, शब्दकोषः अमरकोषः च क्यु. आर्. (Q. R.) माध्यमेन प्राप्यन्ते । सङ्ख्या, घटी, मूल्यमापनस्य प्रारूपं च पाठ्यपुस्तके एव निर्दिष्टम् अस्ति । तत् पाठ्यक्रमे विद्यते ।

# ८.७ सम्बोधनम् ।



रे विनय, कुत्र गच्छसि?



अयि उमेश, सम्यक् गायसि



भो: छात्रा:, यूयम् उत्तराणि लिखथ ।



हे महिला:, आपणम् अत्र।



हे देव, अहं नमामि ।



भो: मिथिले, अपि आवां खेलाव: ?

## भाषाभ्यास:

**१. वाक्यानि कुरुत ।**

१) ............ कदा आगच्छसि? (उदय)
२) रे ............ शीघ्रं लिखसि खलु! (विनीता)
३) भो: ............ अपि वयं पठाम:? (बालक)
४) भो: ............ यूयं सम्यक् नृत्यथ। (बालिका)

**संयुक्त-व्यञ्जनानि ।**

श्र = श् + र् + अ ।
ग्र = ग् + र् + अ ।
त्र = त् + र् + अ ।
ज्ञ = ज् + ञ् + अ ।
क्ष = क् + ष् + अ ।

**संयुक्त-व्यञ्जन-लेखनम् ।**

| | | |
|---|---|---|
| पद्मम् = पद्मम् | चिह्नम् = चिह्नम् | ब्रह्मा= ब्रह्मा |
| द्वितीया = द्वितीया | उद्भव: = उद्भव: | गङ्गा = गङ्गा |
| विद्या = विद्या | नाट्यम् = नाट्यम् | कश्चित्= कश्चित् |
| बुद्धि: = बुद्धि: | विद्वत्ता = विद्वत्ता | |

**शब्दविग्रह: । (उदाहरणानुसारं शब्दविग्रहं कुरुत ।)**

माला- म् + आ + ल् + आ ।
प्रज्ञा- प् + र् + अ + ज् + ञ् + आ ।
चक्षु: - च् + अ + क् + ष् + उ: ।
संस्कृतम्-
चिह्नम् -
जाह्नवी -
अश्व: -

कृष्ण:- क् + ऋ + ष् + ण् + अ: ।
ब्रह्म- ब् + र् + अ + ह् + म् + अ ।
दत्तम् - द् + अ + त् + त् + अ + म् ।
श्रीपाद: -
भुजङ्ग: -
हस्त: -
देव: -

## अष्टमी कक्षा–मूल्यमापनम् ।

**प्रथमं/द्वितीयं सत्रम् – (५० गुणाः)**

**सङ्कलित–मूल्यमापनम्–**

२५ लेखी + ५ मौखिकी ३० गुणाः ।

**आकारिक–मूल्यमापनम्–** २० गुणाः ।

१) वर्गपरीक्षा– (प्रारूपानुसारम्) १० गुणाः ।

२) प्रकल्पः– (आशयाधारितम्) ३ गुणाः ।

३) उपक्रमः– (लेखनकौशल्याधारितम्) २ गुणाः ।

४) लेखनपुस्तिका– ३ गुणाः ।

५) कक्षास्वाध्यायः– २ गुणाः ।

**मौखिकी परीक्षा (५ गुणाः)**

- वाचनम् – २ गुणौ।
  (वर्णोच्चाराः, स्/ष्, न्/ण् भेदाः द्रष्टव्याः)
- कण्ठस्थीकरणम् – ३ गुणाः।

प्रार्थना, श्लोकपठनम्, तालिकापठनम् (नाम, सर्वनाम, क्रियापदम्) पञ्चदशवाक्यानि, सङ्ख्याः घटी च ।

### प्रथम / द्वितीय–सत्रान्त–परीक्षा (२५ गुणाः) सूचित–प्रारूपम् ।

**प्र.१. अ) चित्रं दृष्ट्वा नाम लिखत । (३ तः २) (चित्रपदकोषतः ।)** १

**आ) वर्णमाला–आधारेण।** १

**इ) संख्या–आधारेण। (३ तः २)** १

**ई) समयबोधः (घटी–आधारेण) । (२ तः १)** १

**प्र. २. शब्दज्ञान–आधारेण । (कृतिपत्रिकानिर्माणसमये शिक्षकाः विविधकृतीनाम् उपयोगं कर्तुम् अर्हन्ति । यथा (१) चतुर्थपदं लिखत । (२) मञ्जूषातः शब्दान् चिनुत । (३) शब्दयुग्मं चिनुत । (४) मेलनम् । (५) जालरेखाचित्रं पूरयत ।(६) समूहेतरपदं चिनुत–केवलं समानार्थकपदानां कृते ।)**

**अ) समानार्थकशब्दाः । (४ तः २)** १

**आ) विरुद्धार्थकशब्दाः ।(४ तः २)** १

**इ) विशेषणं विशेष्यं च ।** १

**प्र. ३. अ) श्लोकपूर्तिं कुरुत । (२ तः १)** २

**आ) एकवाक्येन उत्तरं लिखत । (गद्यम्/पद्यम्) (४ तः २)** २

**प्र. ४ अ) (क) माध्यमभाषया सरलार्थं लिखत । (गद्यम्)** ४

**प्रथमं सत्रम् – कान्यपि ६ सरलानि वाक्यानि । (६ तः ४)**

**द्वितीयं सत्रम् – परिच्छेदद्वयं प्रष्टव्यम् । प्रतिपरिच्छेदं ४/५ वाक्यानि । (पाठ क्र. ११, १२, १४)**

**(ख) माध्यमभाषया सरलार्थं लिखत । (पद्यम्) (२ तः १)** २

**प्रथमं सत्रम् – पद्य ९ । द्वितीयं सत्रम् – पद्य १०, १३ ।**

**आ) माध्यमभाषया उत्तरं लिखत । (गद्यम्/पद्यम्) (२ तः १)** २

**प्र. ५. अ) पृथक् कुरुत । (तालिकारूपेण) नाम, सर्वनाम, क्रियापदम्, विशेषणम्। (६ तः ४)** २

**आ) अधोदत्तेषु केवलं प्रश्नद्वयस्य उत्तराणि लिखत ।** ४

**१) योग्यं विभक्तिरूपं लिखत ।**

**२) अव्ययस्य उपयोगं कृत्वा वाक्यं लिखत । (अत्र, ह्यः, पुरतः ...)**

**३) शुद्धं शब्दं/वाक्यं चिनुत ।**

**४) सूचनानुसारं वाक्यपरिवर्तनं कुरुत । (वचनं/पुरुषः/कालपरिवर्तनम्/प्रश्ननिर्माणम्)**

* * *

